श्री शिव स्तोत्रं (कल्कि कृतं)

श्री शिव स्तोत्रं (कल्कि कृतं)

गौरीनाथं विश्वनाथं शरण्यं
भूतावासं वासुकीकंठभूषं |
त्र्यक्षं पंचास्यादिदेवं पुराणं
वंदे सांद्रानंदसंदोहदक्षं || 1 ||

योगाधीशं कामनाशं कराळं
गंगासंगक्लिन्नमूर्धानमीशं |
जटाजूटाटोपरिक्षिप्तभावं
महाकालं चंद्रफालं नमामि || 2 ||

श्मशानस्थं भूतवेताळसंगं
नानाशस्त्रैः खड्गशूलादिभिश्च |
व्यग्रात्युग्रा बाहवो लोकनाशे
यस्य क्रोधोद्भूतलोकेऽस्तमेति || 3 ||

यो भूतादिः पंचभूतैः सिसृक्षु-
स्तन्मात्रात्मा कालकर्मस्वभावैः |
प्रहृत्येदं प्राप्य जीवत्वमीशो
ब्रह्मानंदे रमते तं नमामि || 4 ||

स्थितौ विष्णुः सर्वजिष्णुः सुरात्मा
लोकान्साधून् धर्मसेतून्बिभर्षि |
ब्रह्माद्यंशे योऽभिमानी गुणात्मा
शब्दाद्यंगैस्तं परेशं नमामि || 5 ||

यस्याज्ञया वायवो वाति लोके
ज्वलत्यग्निः सविता याति तप्यन् |
शीतांशुः खे तारका संग्रहश्च
प्रवर्तंते तं परेशं प्रपद्ये || 6 ||

यस्य श्वासात्सर्वधात्री धरित्री
देवो वर्षत्यंबुकालः प्रमाता |
मेरोर्मध्ये भूवनानां च भर्ता
तमीशानं विश्वरूपं नमामि || 7 ||

इति श्रीकल्किपुराणे कल्किकृत शिवस्तोत्रं |